अनुक्रमांकः ..................................
निरीक्षकस्य हस्ताक्षरम् ......................

**Paper Code**
**BV-403**

# पतञ्जलिविश्वविद्यालयः

**परीक्षा – मईमासः – 2019**
**शास्त्री/बी. ए. व्याकरणम् (सत्रम् : चतुर्थम)**
**तृतीयपत्रम् – संस्कृत साहित्यम्**

**समयः – होरात्रयम्** **अधिकतमाङ्काः – 70**

---

**अवधेयम् :** इदं प्रश्नपत्रं सप्ततेः (70) अङ्कानां विद्यते। प्रत्येक खण्डे प्रदत्तानां निर्देशानामनुसरणपुरस्सरमेव प्रश्नानां समाधानं कर्त्तव्यम्। अङ्कविभाजनं प्रत्येकं खण्डस्य प्रश्नस्य च पुरतः द्रष्टुं शक्यते।

**(खण्ड – क)** **25 अङ्काः**

**प्रश्नः1– अधोलिखितेषु पद्येषु केषाञ्चन त्रयाणां छन्दोऽलङ्काररसादिटिप्पणीनिर्देशपुरस्सरं व्याख्यां कुरुत।** **(3X5=15)**

(क) अन्तर्हिते शशिनि सैव कुमुद्वती मे
दृष्टिं न नन्दयति संस्मरणीयशोभा।
इष्टप्रवासजनितान्यबलाजनस्य
दुःखानि नूनमतिमात्रसुदुःसहानि।।

(ख) रम्यान्तरः कमलिनीहरितैः सरोभि –
श्छायाद्रुमैर्नियमितार्कमयूखतापः।
भूयात्कुशेशयरजोमृदुरेणुरस्याः
शान्तानुकूलपवनश्च शिवश्च पन्थाः।।

(ग) उत्पक्ष्मणोर्नयनयोरुपरुद्धवृत्तिं
बाष्पं कुरु स्थिरतया विहतानुबन्धम्।
अस्मिन्नलक्षितनतोन्नतभूमिभागे।
मार्गे पदानि खलु ते विषमीभवन्ति।।

(घ) अभिजनवतो भर्तुः श्लाघ्ये स्थिता गृहिणीपदे
विभवगुरुभिः कृत्यैस्तस्य प्रतिक्षणमाकुला।
तनयमचिरात् प्राचीवार्कं प्रसूय च पावनं
मम विरहजां न त्वं वत्से शुचं गणयिष्यसि।।

(ङ) शमेष्यति मम शोकः कथं नु वत्से त्वया रचितपूर्वम्।
उटजद्वारविरूढं नीवारबलि विलोकयतः।।

**प्रश्नः2– अभिज्ञानशाकुन्तले कण्वर्षिणा दुष्यन्तशकुन्तलाभ्यां प्रदत्तस्योपदेशस्य सारः स्वशब्दैर्लेखनीयः ।** (5)

*अथवा*

**अभिज्ञानशाकुन्तलस्य चतुर्थाङ्कस्य कथां लिखत।**

**प्रश्नः3– अधोलिखितेषु कस्याप्येकस्यांशस्य प्रसङ्गनिर्देशपुरस्सरं व्याख्यां कुरुत –** (5)

(क) कोऽन्यो हुतवहाद् दग्धुं प्रभवति।
(ख) अवेहि तनयां ब्रह्मन्नग्निगर्भां शमीमिव।
(ग) वैतानास्त्वां वह्नयः पावयन्तु।

## (खण्ड – ख) 20 अङ्काः

**प्रश्नः4– अधोलिखितेषु श्लोकेषु केषाञ्चन त्रयाणां श्लोकानां छन्दोऽलङ्काररसादिटिप्पणीनिर्देशपुरस्सरं व्याख्या कुरुत –** **(3X5=15)**

**(क)** आस्तीर्णकोमलविचित्रकुथोदरेषु
स्वैरं विहृत्य भवनेषु कथं भवत्यः।
स्प्रक्ष्यन्ति दुर्जनमनोविषमां श्मशान –
भूमिं सितास्थिशकलप्रकरोत्तरीयाम्।।

**(ख)** गृहोपवनदीर्घिकातरविलम्बिपुष्पद्रुमाः
समीरणचलत्तरङ्गरुचकावलीमेखलाः।
विबुद्धकमलोत्पलाकरनिलीनहंसस्वना
रतेरुपनिबन्धनं मघवतोऽप्यलं कन्यकाः।।

**(ग)** विषयैर्न हि तृप्तिरिन्द्रियाणां
विषयाभ्यासविशेषघस्मराणाम्।
भवतीति विचिन्त्य बुद्धिमन्तः
प्रयतन्ते भवबन्धनक्षयाय।।

**(घ)** अपि चापरिनिष्ठितस्वभावे
प्रियता का नरवीर जीवलोके।
परमार्थविचारपेलवानां
प्रिय इत्येव विभ्रमो मतीनाम्।।

**(ङ)** क्वचिन्नरशिरोघटीविवरनिर्गतासृग्धरा –
वसासवविकारघस्मरपिशाचिपूगाकुलम्।
क्वचित्सिमिसिमायमानचितिकानलालिङ्गित –
स्फुरन्नरकलेवरोदरविनिर्गतान्त्रोरगम्।।

**प्रश्नः5– अधःप्रदत्तेषु केषाञ्चन पञ्चानां व्याकरणात्मिकाः टिप्पण्यो लेखनीयाः –** **(05)**

(क) दुःखहुताशनैः (ख) करपत्रनिष्ठुराः (ग) अकारणवत्सलस्य
(घ) स्वप्नेन्द्रजालसदृशः (ङ) अकालगर्भा (च) अबद्धमूला
(छ) अनिलोद्धततरङ्गभङ्गुराणि (ज) भवकान्तारपरायणाः ।

## (खण्ड – ग) 25 अङ्काः

**प्रश्नः6– अधोलिखितेषु दोषष् कयोरपि द्वयोः सङ्गतिनिर्देशपूर्वकं लक्षणोदाहरणे लेखनीये –** **(2X5=10)**

पदगतं दुःश्रवत्वम्। पदगतं ग्राम्यत्वम्।
कथितपदत्वम्। अर्थप्रतीतौ कष्टत्वम्।

**प्रश्नः7– अधःप्रदत्तयोः कस्मिश्चिदेकस्मिन्नुदाहरणे सोपपत्ति दोषोऽनुसन्धेयः –** **(05)**

**(क)** आशीःपरम्परां वन्द्यां कर्णे दत्त्वा कृपां कुरु।

**(ख)** परोपकारनिरतैर्दुर्जनैः सह सङ्गतिम्।
कर्त्तव्यः साधुसंसर्गो न विधेया कदाचन।।

**प्रश्नः8– माधुर्यगुणस्य *अथवा* प्रसादगुणस्य तद्व्यञ्जकवर्णनिर्देशपुरस्सरं लक्षणोदाहरणे प्रतिपादयत ..........** **(10)**

---------------x---------------